# Markandeyakritam 2 Vishnu Stotram

# मार्कण्डेयकृतं २ विष्णुस्तोत्रम्

## Document Information

Text title : Markandeyakritam 2 Vishnu Stotram

File name : mArkaNDeyakRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 3/17-26||

Latest update : April 27, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2025

*sanskritdocuments.org*

# मार्कण्डेयकृतं २ विष्णुस्तोत्रम्

मार्कण्डेय उवाच ।
त्वत्पादपद्मानुसरानुषङ्गं रुद्रेन्द्रपद्मासनसम्पदाढ्यम् ।
त्वद्भक्तिहीनं परितः प्रतप्तं दीनं परित्राहि कृपाम्बुधे माम् ॥ १७॥

ब्रह्मादिभिर्यत्परिचर्यमाणं पदाम्बुजद्वन्द्वमचिन्त्यशक्ति ।
श्वः श्रेयसप्राप्तिनिदानतत्त्वं दीनं परित्राहि कृपाम्बुधे माम् ॥ १८॥

यदङ्गभूतं जगदण्डमेतदनेककोटि प्रगुणं विभाति ।
लीलाविलासस्थितिसृष्टिलीनं तन्मां सुदीनं परिरक्ष विष्णो ॥ १९॥

एकं सुवर्णं कटकादिभेदैर्नाना यथा वा नभसोदितोऽर्कः ।
आधारवैषम्यजलेषु तादृग्विभाव्यसे निर्गुण एक एव ॥ २.३.२०॥

अशेषसम्पूर्णरुचिप्रहीणोपादानसङ्कल्पविवर्जितोऽपि ।
दीनानुकम्पानुगुणं बिभर्षि युगे युगे देहमपारशक्ते ॥ २१॥

त्वत्पादपद्मं जगदीश पूर्वमसेव्यतानात्मधिया मया यत् ।
तत्कर्मणा दारुणपाकभाजं दीनं परित्राहि कृपाम्बुधे माम् ॥ २२॥

अशेषलोकस्थितिसृष्टिलीनविलासि यत्ते त्रिगुणं विभाति ।
वपुर्महात्मन्महदादिहेतुर्हेतोर्नमस्ते प्रकृतेः परस्य ॥ २३॥

सर्वत्र गत्वा बृहदप्रमेयं प्रवर्द्धमानं त्वयि बृंहितं च ।
तद्ब्रह्मरूपं परिणामहेतुं स्वाध्यात्मविश्वात्मकमाश्रयामि ॥ २४॥

एकार्णवे महाघोरे नावस्थातुं प्रदेशभूः ।
अस्ति लक्ष्मीपते मेघवारिवातप्रकम्पनात् ॥ २५॥

त्राहि विष्णो जगन्नाथ मग्नं संसारसागरे ।
मामुद्धरास्माद्गोविन्द कृपापाङ्गविलोकनात् ॥ २६॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये

तृतीयाध्यायान्तर्गतं मार्कण्डेयकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय ३/१७-२६ ॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 3/17-26..

Proofread by PSA Easwaran

*Markandeyakritam 2 Vishnu Stotram*
pdf was typeset on April 27, 2025

Please send corrections to *sanskrit@cheerful.com*